सप्तदशः पाठः

# राज्ञी दुर्गावती



**दीक्षा** — भ्रातः! त्वं कुत्र पठसि?

**रमणः** — अहं जबलपुरनगरे पठामि।

**दीक्षा** — तत्र कस्यां संस्थायाम् अध्ययनं करोषि?

**रमणः** — अहं "रानीदुर्गावतीविश्वविद्यालये" अध्ययनं करोमि।

**दीक्षा** — महाराज्ञी दुर्गावती का आसीत् यस्याः नाम्ना विश्वविद्यालयः प्रचलति।

**रमणः** — महाराज्ञी दुर्गावती मध्यप्रदेशस्य मण्डलाक्षेत्रस्य वीराङ्गना आसीत्। सा चन्देलराज्यपुत्री आसीत्। तस्याः विवाहः गोंडराजदलपतशाहेन सह अभवत्। दलपतशाहः गोंडवानाराज्यस्य राजधान्यां मण्डलानगरे न्यवसत्। विवाहात् चतुर्वर्षाणाम् अनन्तरं दलपतशाहः दिवङ्गतः।

**दीक्षा** — तदा दलपतशाहस्य पुत्रः नृपः अभवत् किम्?

**रमणः** — आम्! राज्ञः मरणोपरान्तं तस्य अल्पवयस्कपुत्रः वीरनारायणः राजा अभवत्।

**दीक्षा** — केन कारणेन सा इयती प्रसिद्धा?

**रमणः** — वीरनारायणः बालक एव आसीत्। अतः सा दुर्गावती चातुर्येण शौर्येण च राज्यमकरोत्। अतएव सा "महाराज्ञी" इति उपाधिना विभूषिता।

**दीक्षा** — तस्याः राज्यस्य वैशिष्ट्यं किम् आसीत्?

**रमणः** — राज्ञी दुर्गावती धीरा वीरा च आसीत्। राजकार्येषु युद्धविद्यायां च प्रवीणा आसीत्। प्रजासु तस्याः पुत्रवत् स्नेहः आसीत्। प्रजा अपि तां माता इव अपश्यन्। लोककल्याणमेव तस्याः आदर्शः। तस्याः राज्यकाले सर्वत्र सम्पन्नता आसीत्।

**दीक्षा** — केनापि सह तस्याः युद्धम् अभवत् किम्?

**रमणः** — आम्! अवश्यमेव, तस्याः राज्यस्य सुखसमृद्धिम् असहमानः अकबरस्य सेनापतिः आसफखानः तस्याः उपरि आक्रमणम् अकरोत्। सा रणचण्डी भूत्वा युद्धं कृतवती, प्रथमदिवसे विजयं च प्राप्नोत्।

**दीक्षा** — तदन्तरं दुर्गावत्याः पूर्णविजयः अभवत् किम्?

**रमणः** — न, पराजितः आसफखानः द्वितीयदिवसे शतघ्नीनां प्रयोगं कुर्वन् प्रचण्डाक्रमणम् अकरोत्। तस्य प्रतिरोधे असमर्थाः बहवः गौंडसैनिकाः हताः। अस्मिन् युद्धे एकः बाणः तस्याः नेत्रे, द्वितीयश्च कण्ठे लग्नः, तथापि सा युद्धं कृतवती अन्ते मृत्युं समीपम् अवलोक्य स्वसम्मानरक्षायै सा स्वयमेव कृपाणघातेन प्राणान् अत्यजत्।

**दीक्षा** — इदं तु बहुकष्टकारकम्।

**रमणः** — आम्, तस्याः बलिदानम् अधुनापि जनाः स्मरन्ति। जबलपुरमण्डलामार्गे तस्याः समाधिः अस्ति। काव्येषु लोकगीतेषु इतिहासे च सा अद्यापि यशःशरीरेण जीवति।

**दीक्षा** — सत्यम्! दुर्गावती दुर्गा इव आसीत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| सह | = साथ में | न्यवसत् | = निवास करते थे |
| दिवङ्गतः | = स्वर्गवास होना | प्रतिरोधः | = विरोध करना |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**
   - (क) महाराज्ञी दुर्गावती कुत्र जाता?
   - (ख) दुर्गावत्याः विवाहः केन सह जातः?
   - (ग) दुर्गावती कृपाणेन किम् अकरोत्?
   - (घ) दुर्गावत्याः पुत्रः कः आसीत्?
   - (ङ) दुर्गावतीविश्वविद्यालयः कुत्र स्थितः?

2. **एकवाक्येन उत्तरं लिखत–**
   - (क) दुर्गावत्याः समाधिः कुत्र अस्ति?
   - (ख) प्रजासु दुर्गावत्याः कीदृशः स्नेहः आसीत्?
   - (ग) कः दुर्गावत्याः उपरि आक्रमणम् अकरोत्?

3. **अधोलिखितपदानां मूलशब्दाः विभक्तयः वचनानि च लिख्यन्ताम्–**

**यथा** मध्यप्रदेशस्य ‘मध्यप्रदेश’ शब्दः ‘षष्ठी’ विभक्तिः एकवचनम्

| | | |
|---|---|---|
| (क) मण्डलाक्षेत्रे | (ख) दलपतशाहेन | (ग) राजकार्येषु |
| (घ) राजधान्याम् | (ङ) रक्षायै | (च) तस्याः |

4. **अधोलिखितपदानां मूलधातु-लकार-पुरुष-वचनानि लिखत–**

**यथा–** अभवत् ‘भू’ धातुः ‘लङ्’लकारः प्रथमपुरुषः एकवचनम्

(क) न्यवसत् (ख) अकरोत् (ग) आसीत्

(घ) अपश्यत् (ङ) प्राप्नोत् (च) अत्यजत्

5. **कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत–**

(क) सा चन्देलराज्यपुत्री ..................। (आसीत्/आस्ताम्)

(ख) प्रजा अपि तां मातेव..................। (पश्यत्/अपश्यन्)

(ग) सा रणचण्डी भूत्वा युद्धम्..................। (अकरोत्/अकुर्वन्)

(घ) तस्याः बलिदानम् अधुनापि जनाः ..................। (स्मरतः/स्मरन्ति)

(ङ) सा अद्यापि यशःशरीरेण ..................। (जीवति/जीवन्ति)

6. **अधोलिखिततालिकया वाक्यानि रचयन्तु–**

| | | | | |
|---|---|---|---|---|
| (क) | वीरनारायणः | तां | माता इव | स्नेहः आसीत् |
| (ख) | दुर्गावती | बालकः | पुत्रवत् | आसीत् |
| (ग) | राज्ञी दुर्गावती | चातुर्येण | एव | अपश्यन् |
| (घ) | प्रजासु | धीरा | शौर्येण | आसीत् |
| (ङ) | प्रजा अपि | तस्याः | वीरा च | राज्यमकरोत् |

7. **अत्र ‘पठ्’ धातोः लङ्लकारस्य रूपाणि प्रदीयन्ते तद्नुसारम् अधोलिखितानाम् अन्येषां धातूनां रूपाणि अपि लिखन्तु–**

**‘पठ्’ धातुः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

वस्, लिख्, भू (भव्) क्रीड्, धाव्, खाद्, गम् (गच्छ्)

8. **अधोलिखितवाक्यानां शुद्धरूपाणि लिखत–**

(क) सा ‘‘महाराज्ञी’’ उपाधिना विभूषितः।

(ख) महिला अगच्छन्।

(ग) वीरनारायणः जाता।

(घ) आसफखानः आक्रमणम् अकुर्मः।

(ङ) बालकाः अक्रीडत्।

*या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता नमस्तस्यै।*